# अष्टाङ्गहृदयम्

राष्ट्रिय संस्कृत संस्थान
नई दिल्ली

# पुरोवाक्

विदन्त्येव विपश्चितो यत्संस्कृतभाषा भारतीयां साहित्यपरम्परां तत्संवलितां प्रज्ञाञ्च सहस्रशो वर्षेभ्य: प्रकाशयन्ती संवर्धयन्ती च राजते। इयं हि भाषा परम्परा प्रज्ञा च प्रतियुगं नवनवमात्मानं प्रस्फुरति समाविष्करोति च। तत्र च वेदा:, शास्त्रीयं वाङ्मयम्, इतिहास:, पुराणानि, काव्यानीत्यनेकरचना: विकासंगता:। ताश्च परम्परया संरक्षिताश्च। तत्ता आधुनिकशैल्या च संरक्षितुकामं राष्ट्रियसंस्कृतसंस्थानं मुद्रणं सान्द्रमुद्रिकानिर्माणं, सङ्गणकद्वारा संरक्षणमिति विविधप्रयासै: प्रयतमानं वर्तते। तत्राद्यं स्थानं भजते अध्ययनमध्यापनमिति स्वीयपरिसरेषु यत्र मौखिकपद्धत्या इमा: परम्परा: संरक्ष्यन्ते।

सर्वसाधनसम्पन्नेऽस्मिन्नाधुनिकलोकेऽपि ग्रन्थानां महत्ता न किञ्चिन्न्यूना दृश्यते। तत्र च कारणं सर्वजनसुलभतैव। अतएव संस्थानमपि ग्रन्थप्रकाशनकर्मणि आत्मानं सततं व्यापारयति। न केवलं स्वयं ग्रन्थान् प्रकाशयति अपि तु ग्रन्थप्रकाशनार्थमनुदानमपि दत्त्वा प्रकाशकान् लेखकांश्च प्रोत्साहयति। लोकप्रियग्रन्थमाला, शास्त्रीयग्रन्थमाला, अप्रकाशितग्रन्थप्रकाशनमाला इति विविधग्रन्थमाला: संस्थानेन प्रकाश्यन्ते। ते च ग्रन्था: भृशं विद्वल्लोकेन समादृता आद्रियन्ते च। एतदतिरिच्य संस्कृतभाषाध्ययनार्थमपि स्वाध्यायशैल्या विरचिता दीक्षाग्रन्था अपि संस्थानेन प्रकाशिता लोके चिरं प्रतिष्ठायां प्राप्नुवन् ये च ग्रन्था: अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु आभारतं प्रधानतया पाठ्यन्ते।

एवं प्रकाशितग्रन्था: अचिरादेव विद्वत्समाजस्य स्वाध्यायरतानां जिज्ञासूनां छात्राणां च कृते सुलभ्या भवन्तीति संस्थानप्रकाशनानां वैशिष्ट्यं प्रयोजनञ्च चरितार्थतां याति। तादृशग्रन्थानां पुन: प्रकाशनायापि संस्थानं कटिबद्धं वर्तते। तत्र क्रमे एष ग्रन्थो विद्वल्लोकेन भृशं समादृत: **अष्टाङ्गहृदयम्** इति नामक: आयुर्वेद: शास्त्रीय: संस्थानस्य पुनर्मुद्रणयोजनान्तर्गततया प्राकाश्यन्नीयते। एषोऽपि ग्रन्थ: सर्वै: यथापूर्वं समाद्रियेत इति विश्वसिमि। अस्मिन् पुनर्मुद्रणकर्मणि साहाय्यमाचरितवद्भ्य: सर्वेभ्य: संस्थानस्य अधिकारिभ्य: सम्यङ् मुद्रणार्थं च मुद्रकाय साधुवादान् वितरामि।

**–राधावल्लभ: त्रिपाठी**

# ग्रन्थालोकः ।

विषयाः । पृष्ठानि ।


१ अष्टाङ्गहृदयस्य षष्ठावृत्तेः प्रस्तावना—( भिषगाचार्यहरिशास्त्रीपराडकरवैद्यविरचिता )। १—२
२ वाग्भटविमर्शः—( भिषगाचार्यहरिशास्त्रीपराडकरवैद्यविरचितः ) । १-४२
३ सूचिपत्रं प्रथमम्—अष्टाङ्गहृदये वाग्भटेन निर्दिष्टानां ग्रन्थानां ग्रन्थकाराणां मुनीनां चाकारादिक्रमेण सूचिपत्रम् । १
४ सूचिपत्रं द्वितीयम्—अष्टाङ्गहृदये वाग्भटेनोपनिबद्धानां वृत्तानामकारादिक्रमेण सूचिपत्रम् । २
५ सूचिपत्रं तृतीयम्—सर्वाङ्गसुन्दरायामरुणदत्तेन समुल्लिखितानां ग्रन्थानां ग्रन्थकाराणां चाकारादिक्रमेण सूचिपत्रम् । ३—४
६ सूचिपत्रं चतुर्थम्—आयुर्वेदरसायने हेमाद्रिणा समुल्लिखितानां ग्रन्थानां ग्रन्थकाराणां चाकारादिक्रमेण सूचिपत्रम् । ५—६
७ सूचिपत्रं पञ्चमम्—टिप्पणीषु समुल्लिखितानां ग्रन्थानां ग्रन्थकाराणां चाकारादिक्रमेण सूचिपत्रम् । ७—८
८ सूचिपत्रं षष्ठम्—टीकाटिप्पणीषूपयोजितानां संक्षिप्तचिन्हानां तज्ज्ञेयानां नाम्नां चाकारादिक्रमेण सूचिपत्रम् । ९-१०
९ सूचिपत्रं सप्तमम्—अष्टाङ्गहृदयस्य तथा तट्टीकाद्वयस्य संशोधनार्थं समानीतानां हस्तलिखितपुस्तकानां अकारादिसंज्ञादर्शकं संक्षिप्तवृत्तदर्शकं च सूचिपत्रम् । ११-१६
१० सूचिपत्रं अष्टमम्—अष्टाङ्गहृदयस्य तट्टीकाद्वयस्य च संशोधनार्थं तथा वाग्भटविमर्शार्थमुपयोजितानां मुद्रितपुस्तकानामकारादिक्रमेण सूचिपत्रम् । १७-१८
११ सूचिपत्रं नवमम्—अष्टाङ्गहृदयस्यास्यां षष्ठावृत्तौ प्रत्यध्यायं श्लोकसंख्यायास्तथा पूर्वावृत्तितो न्यूनाधिकश्लोकसंख्यायाश्च दर्शकं सूचिपत्रम् । १९-२०
१२ शुद्धिपत्रम् । २१-२३
१३ पी. के. गोडे महाभागैर्विरचिता आंग्लभाषोपनिबद्धा प्रस्तावना । 1—12
१४ प्रथमावृत्तिद्वितीयावृत्त्योः प्रस्तावने—( कै. डॉ. कुण्टेमहाभागैर्विरचिते । ) १-३२
१५ तृतीयावृत्तिप्रस्तावना—( कृष्णशास्त्रीनवरेमहाभागैर्विरचिता । ) ३३-३४
१६ अष्टाङ्गहृदयस्य विषयानुक्रमणिका—( अध्यायानुक्रमेण ) १-५३
१७ अष्टाङ्गहृदयस्थयन्त्रशस्त्रचित्रानुक्रमणिका । ५४
१८ अष्टाङ्गहृदयमूलं टीकाद्वयोपेतं टिप्पण्यादियुतं च । १-९५६

"**हेमाद्रिणा** चतुर्वर्गचिन्तामणिविधायिना ।
क्रियतेऽष्टाङ्गहृदयस्यायुर्वेदस्य सुग्रहा ।
टीकाकारैर्न निर्णीतमिह **हेमाद्रि**णोदितम् ।
ऊर्ध्वाधोगति निर्गमय्य मदनैर्दन्त्यादिभिर्भित्रिद्विषो
दोपानद्रढि रामराज्यमगदङ्कारेण **हेमाद्रिणा** ॥" इति ।

अस्माच्च चतुर्वर्गचिन्तामणिकर्त्रा एव आयुर्वेदरसायनाभिधा टीका विरचिता इति स्पष्टं भवति ।

अरुणदत्तविरचितायां टीकायां **हेमाद्रे**रुल्लेखो न कृत इति हेतोः आयुर्वेदरसायनं **हेमाद्रि**भिन्नेन केनचिन्निर्मितं भवेदिति यत् पाध्येमहोदयैर्लिखितं तदप्यसाम्प्रतम् । अरुणदत्तो हि **हेमाद्रेः** प्राग्भवः । तेन चारुणदत्तविरचितायां सर्वाङ्गसुन्दराभिधायां टीकायां **हेमाद्रे**रुल्लेखो नैव भवितुं शक्यते, न वा समुपलभ्यते । अरुणदत्तो **हेमाद्रेः** प्राग्भव इति **हृ.** सू. अ. ७ श्लो. ४० टीकायां अरुणदत्तस्य नामग्रहणपूर्वकात् **हेमाद्रि**कृतादुल्लेखात् स्पष्टं भवति ।

"कालिदासप्रणीतस्य रघुवंशस्य टीकाकारेषु चारित्र्यवर्धनो वल्लभः हेमाद्रिः मल्लिनाथश्च अतिप्रसिद्धाः । तेषु **हेमाद्रिणा** दर्पणाख्या रघुवंशस्य टीका विरचिता इति ज्ञायते । इयं दर्पणाख्या **हेमाद्रेः** रघुवंशटीका कव्यभिप्रायप्रकटनकौशले सर्वाभ्य इतराभ्यष्टीकाभ्य अतिरिच्यत इति बहूनां विदुषां मतम् । किन्तु दर्पणाख्यटीकाकारो **हेमाद्रिः** आयुर्वेदरसायनाख्यव्याख्याकर्तुर्**हेमाद्रेः** भिन्नः उत अभिन्नः इति विषयोऽद्यापि संशयावच्छन्न एव । रघुवंशटीकाकर्तुः **हेमाद्रेः** पितुर्नाम ईश्वरसूरिः आसीदिति दर्पणटीकासमाप्तौ निर्दिष्टं वर्तते । अथ आयुर्वेदरसायनप्रणेतुः **हेमाद्रेः** पितृनाम कामदेव इति पूर्वं प्रदर्शितमेव ।" इति विलिख्य उभावेतावभिन्नौ इति पक्षः पाध्येमहोदयैः **हेमाद्रिचरितग्रन्थे** सप्तमाष्टमयोः पृष्ठयोः समर्थितो वर्तते ।

**हेमाद्रि**काले यद्यपि बहूनां लिपीनां आसीच्चिरप्रवृत्तः प्रचारः, तथापि प्रायः सर्वे संस्कृतग्रन्थाः तथा च महाराष्ट्रभाषोपनिबद्धाः ग्रन्थाः देवनागर्याख्यायामेव लिप्यां लिख्यन्ते स्म । राजव्यवहारेऽपि प्रायेणास्यामेव लिप्यामक्रियत व्यवहारः । सकललिपिशेखरीभूताया अप्यस्या देवनागर्याः लघुलेखनानुपकारित्वमवलोक्य लघुलेखनसुलभा 'मोडी' लिपिः **हेमाद्रिणा** संशोध्य प्रसारितेति पुरावृत्तविदो वदन्ति ।

**हेमाद्रेर्व्याख्याकौशलम् ।**

**हेमाद्रिणा** आयुर्वेदरसायनाख्यायां टीकायां अष्टाङ्गहृदयनिर्दिष्टानां विषयाणां वाग्विभवसंयुतं अतिसूक्ष्मं च कृतं विशदीकरणम् । यत्रयत्र अरुणदत्तादीनां व्याख्याकाराणां व्याख्यानं नास्य सम्मतं तत्रतत्र आत्मसम्मतं भिन्नं मतं सुस्पष्टरूपेण प्रकटितमनेन । क्वचिच्च तेभ्यः सुविस्तृतं वर्तते विवरणं **हेमाद्रेः** । सू. अ. १।१८, सू. अ. ३।१, सू. अ. ५।२३, सू. अ. ६।७५, सू. अ. ६।१०५, सू. अ. ६।११२, सू. अ. ६।१५८, सू. अ. ७।४०, सू. अ. ७।४७–४८, सू. अ. ८।३४, सू. अ. ११।३७, इत्यादिषु स्थलेषु **हेमाद्रि**कृतं व्याख्यानकौशलं अवश्यं दर्शनीयम् ।

तथा च **सङ्ग्रहा**न्तर्गता ये विषयाः **हृदये**ऽतिचारितास्ते सर्वे **हेमाद्रिणा** अध्यायावसाने क्वचिच्च अध्यायमध्येऽपि **'सङ्ग्रहे तु'** इति विलिख्योद्धृताः । तेन च **हेमाद्रि**टीकासमेत**मष्टाङ्गहृदय**मधीयानानां पुनः **सङ्ग्रह**ग्रन्थाध्ययनमनवश्यकं भवति । अथ **हेमाद्रिणा** 'सङ्ग्रहे तु' इति विलिख्य यः सङ्ग्रहान्तर्गतो गद्यपद्यात्मको भागः उद्धृतः, तदन्तवर्तिनः केचन श्लोकाः **अष्टाङ्गसङ्ग्रहस्य** मुद्रितेषु पुस्तकेषु नोपलभ्यन्ते । एवमेव **अरुणदत्तेन** सङ्ग्रहादुद्धृतान्यपि कानिचिद्वचनानि **अष्टाङ्गसङ्ग्रहस्य** मुद्रितपुस्तकेषु **न** प्राप्यन्ते । तेन च अधिकपाठसंयुत**मष्टाङ्गसङ्ग्रह**पुस्तकं **हेमाद्रे**स्तथा **अरुणदत्तस्य** च समये लब्धप्रचारमासीदित्यनुमीयते ।